# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा-शास्त्री-३ | प्रश्नपत्रम् – ७ | गुणाः – ७० |
| विषयः – धर्मशास्त्रम् | सत्रम्- ६ (षष्ठम्) | समयः- ०८:०० तः ११:०० |
| दिनाङ्कः – ०३/०४/२०२० | सन्दर्भग्रन्थः – विदुरनीतिः (अध्यायाः - १– ८) | |

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्नः १ अधोलिखितयोः द्वयोः व्याख्या कर्या** १०

१ विपरीततरश्च त्वं भागधेयं न सम्मतः।
अर्चिषां प्रक्षयाच्चैवं धर्मात्मा धर्मकोविदः।

२ पितापुत्रो सहासीतां द्वौ विप्रौ क्षत्रियावपि।
वृद्धौ वैश्यौ च शूद्रौ च न त्वन्यावितरेतरम्।।

३ वनस्पतेरपक्वानि फलानि प्रचिनोति यः।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति।

**प्रश्नः २ द्वयोः कमप्येकम् उत्तरयत।** १०

१ विदूरेण धृतराष्ट्राय प्रदत्तः राजधर्मोपदेशः विविच्यताम्।

२ विदुरनीतेः सारांशो सविस्तरं लिखत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्नः ३ द्वयोः ससन्दर्भ भावार्थो लेख्यः।** १०

१ भावमिच्छति सर्वस्य नाभावे कुरुते मनः।
सत्यवादी मृदुर्दान्तो यः स उत्तमपुरुषः।

२ त्यजेत् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्।।

३ अनसूयार्जवं शौचं सन्तोषः प्रियवादिता।
दमः सत्यमनायासो न भवन्ति दुरात्मनाम्।।

**प्रश्नः ४ कस्यापि एकस्य उत्तरं सविस्तरं लिखत।** १०

१ मुर्खप्रकारान् विलिख्य सविस्तरं चर्चयत।

२ विदुरनीतौ प्रतिपादितान् महाकुललक्षणानि यथाग्रन्थं निरूपयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ द्वयोः सविशेषार्थं लिखत।** १०

१ सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः।

२ करिष्यान्नं प्रभाषेत कृतान्येव तु दर्शयेत्।
धर्मकामार्थकार्याणि तथा मन्त्रो न भिद्यते।

३ यत्र स्त्री यत्र कितवो बालो यत्रानुशासिता।
भज्जन्ति तेऽवशाराजन् नद्यामश्मप्लवा इव।।

**प्रश्नः ६ कस्यापि एकस्य उत्तरं सविस्तारं लिखत।** १०

१ विदुरनीतेः पूर्वभूमिकां सिवस्तरं लिखत।

२ नीतिशास्त्रीयग्रन्थेषु विदुरनीतेः महत्त्वं प्रतिपादयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ केषाञ्चन दशानाम् उत्तराणि लिखत।** १०

१ विदूरनीतौ प्रधानसंवादः केषां मध्ये विद्यते?

२ विदूरनीतौ कति अध्यायाः सन्ति?

३ विरोचनः कस्य पुत्रः आसीत्?

४ आचारशब्दस्य व्युत्पत्तिः का?

५ विदूरनीतिः कस्मिन् पर्वणि आगच्छति?

६ जरा किं हरति?

७ रथः कस्य शरीरम् अस्ति?

८ विद्या केन रक्ष्यते?

९ श्रुतं कुत्र नष्टं भवति?

१० गावः केन पश्यन्ति?

११ विदूरनीतौ कानि पात्राणि सन्ति?

१२ छात्राणां कति दोषाः सन्ति?

१३ कति च के पुरुषार्थाः सन्ति?

१४ के च कति वर्णाः सन्ति?

१५ नरकस्य द्वारं कतिविधम् अस्ति?

**************************